श्रीमतिकीर्त्युपाध्यायविरचिता स्वोपज्ञवृत्तिविभूषिता गुणकित्त्व-षोडशिका

- म. विनयसागर

गुणकित्त्व-षोडशिका व्याकरण के एक लघु-अंश पर विचार-विमर्श करती है । व्याकरण शब्दों पर अनुशासन करता है अर्थात् शब्दों के उद्‌गम स्थान से लेकर उच्चारण पर्यन्त इसका अनुशासन चलता है । इन्हीं वर्णों से मन्त्र और तन्त्रों का भी निर्माण होता है । इसीलिए महाभाष्यकार भगवान पतञ्जलि भी कहते हैं कि - 'एक शब्द के भी शुद्ध उच्चारण से समस्त प्रकार का मङ्गल होता है और स्वर या वर्ण का अशुद्ध उच्चारण शत्रु की तरह अनर्थकारी होता है ।' वैयाकरणों की यह मान्य परम्परा रही है कि वे शब्दों के लाघवमात्र से पुत्रजन्मोत्सव की तरह उत्सव मनाते हैं ।

लेखक-परिचय :

मतिकीर्ति खरतरगच्छ की परम्परा में क्षेमकीर्ति शाखा में महोपाध्याय श्रीजयसोम के प्रशिष्य और गुणविनयोपाध्याय के शिष्य हैं । इनका कोई ऐतिहासिक परिचय प्राप्त नहीं होता है, किन्तु मतिकीर्ति में 'कीर्ति'नन्दी को देखते हुए दीक्षा समय का अनुमान किया जा सकता है। युगप्रधान जिनचन्द्रसूरि स्थापित ४४ नन्दियों में 'कीर्ति'नन्दी का क्रमाङ्क ४०वाँ है । कीर्ति नामांकित सहजकीर्त्ति द्वारा सं० १६६१ में रचित सुदर्शन चौपाई, पुण्यकीर्ति द्वारा सं० १६६२ में रचित पुण्यसार रास, विमलकीर्त्ति द्वारा सं० १६६५ में रचित यशोधर रास आदि कृतियों के आधार पर यह अनुमान किया जा सकता है कि 'कीर्त्ति'नन्दी की स्थापना सं० १६५२-५५ के लगभग हुई होगी । अतः मतिकीर्त्ति का दीक्षाकाल भी यही है ।

गुणविनयजी के सहयोग के रूप में इनका उल्लेख सर्वप्रथम सं० १६७१ में मिलता है । 'निशीथचूर्णि' प्रति का संशोधन गुणविनयजी ने मतिकीर्त्ति की सहायता से किया था । उल्लेख इस प्रकार है :-

''संवत् १६७१ जैसलमेरदुर्गे श्रीजयसोममहोपाध्यायानां शिष्य-

श्रीगुणविनयोपाध्यायैः शोधितं स्वशिष्य-पं० मतिकीर्त्तिकृतसहायकैर्निशीथचूर्णि-द्वितीयखण्ड ।''

– शाहरुशाह भण्डार, जेसलमेर

सं० १६७३ में प्रणीत 'प्रश्नोत्तरमालिका' में तथा सं० १६७४ में रचित 'लुम्पकमततमोदिनकर चौपाई' में गुणविनयजी ने मतिकीर्त्ति का सहायक के रूप में उल्लेख किया है ।

साहित्य-रचना :

मतिकीर्ति-प्रणीत साहित्य का अवलोकन करने से स्पष्ट है कि ये जैनागमों के प्रौढ विद्वान् थे, शास्त्रीय चर्चा में भी अग्रगण्य थे । व्याकरण-शास्त्र के भी ये अच्छे अभ्यासी थे, और राजस्थानी भाषा पर भी इनका अच्छा अधिकार था । इनका साहित्य-सर्जन काल सं० १६७४ से १६९७ के मध्य का है । इनकी प्रणीत १२ कृतियाँ प्राप्त है, जो निम्नांकित है :-

१. दशाश्रुतस्कन्धसूत्र-टीका – रचना संवत् १६९७, श्लोक परिमाण-१८००० । इसकी एक मात्र प्रति जैनशास्त्र-माला-कार्यालय, लुधियाना में प्राप्त है । महोपाध्याय समयसुन्दरजी ने आपने 'कथाकोश' में इसका उद्धरण भी दिया है । सुना है कि कोई आचार्य महोदय इस टीका का सम्पादन कर रहे हैं ।

२. निर्युक्तिस्थापन – इसका प्रसिद्ध नाम 'प्रश्नोत्तरशास्त्र' है । आवश्यकनिर्युक्ति के विसंवादपूर्ण वक्तव्यों को १० प्रश्नों के माध्यम से आगमों के प्रमाणों द्वारा सिद्ध करने का प्रयत्न किया है । इसकी रचना संवत् १६७६ के पश्चात् की गई है ।

३. २१ प्रश्नोत्तर – साधु लखमसी कृत २१ प्रश्नोत्तर के प्रत्युत्तर दिये गए हैं । गणिपंद का उल्लेख होने से रचना संवत् १६७६ के पश्चात् की गई है ।

४. भाष्यत्रय-बालावबोध – रचना संवत् १६७७, स्थल जैसलमेर है । भणसाली-गोत्रीय शाहरुशाह, जैसलमेर के आग्रह से हुई है ।

५. सम्यक्त्वकुलक-बालावबोध – इसकी संवत् १६५५ की लिखित प्रति प्राप्त है ।

६. गुणकित्त्व-षोडशिका - परिचय आगे दिया जाएगा ।

७. अघटकुमार-चौपाई - रचना संवत् १६७४ में जिनसिंहसूरि के राज्य में हुई है ।

८. धर्मबुद्धि-सुबुद्धि-चौपाई - रचना संवत् १६९७, राजनगर ।

९. ललितांग-रास

१०. लुम्पक-मतोत्थापक-गीत - इसमें लोकाशाह के मत का खण्डन किया गया है ।

११. पञ्चकल्याणकस्तव-बालावबोध

१२. सप्तस्मरण-स्तबक

इन कृतियों का परिचय देखें - **खरतरगच्छ-साहित्य-कोश** ।

गुणकित्त्व-षोडशिका

इसमें मूल श्लोक १६ हैं । गुण और कित्त्व पर विचार होने के कारण गुणकित्त्व-षोडशिका नामकरण किया गया है । इस पर स्वोपज्ञ टीका है । यह ग्रन्थ व्याकरण शास्त्र से सम्बन्ध रखता है । धातुरूपों में किस अवस्था में कित्त्व या गुण होता है इस पर सम्यक् रीति से विचार किया गया है । फक्किका स्वरूप इसकी रचना है । टीका में पाणिनि-व्याकरण के सूत्र और धातुपाठ देते हुए इसका सम्यक् प्रकार से प्रतिपादन किया है।

प्रशस्ति में रचना संवत् प्राप्त नहीं है, किन्तु ''श्रीजिनसिंहसूरि-विजयिराज्ये'' उल्लेख होने से स्पष्ट है कि श्रीजिनसिंहसूरि का साम्राज्यकाल १६७० से १६७४ का है, अतः इसकी रचना भी इसी मध्य में हुई होगी ।

प्रतिलिपिकार :

प्रान्त पुष्पिका में ''पं० श्रीजिवकीर्त्तिगणि-लिखितं'' लिखा है । इसमें लेखन-संवत् नहीं दिया है । जीवकीर्त्ति में 'कीर्ति'नन्दी को देखते हुए यह अनुमान किया जा सकता है कि मतिकीर्ति के साथ ही इनकी दीक्षा हुई होगी या उसी संवत् के आस-पास हुइ होगी । मतिकीर्ति के साथ या उसके पश्चात् दीक्षा होने से यह स्पष्ट है कि ये भी श्रीगुणविनयोपाध्याय के शिष्य थे । इसके द्वारा रचित साहित्य प्राप्त नहीं है, किन्तु गुणविनयोपाध्याय-रचित भाव-

विवेचन, नल-दमयन्ती-प्रबन्ध और मूलदेव-चौपाई की लिखित प्रतियाँ प्राप्त हैं ।

इसकी एकमात्र ७ पत्रों की प्रति श्रीखरतरगच्छ ज्ञानभण्डार, शिवजीराम भवन, जयपुर में २०६/५५९ में सुरक्षित है । मैंने इसी प्रति के आधार से सन् १९४५ में प्रतिलिपि की थी । इस भण्डार के अधिकारियों से कई बार अनुरोध करने पर भी यह प्रति पाठमिलान के लिए प्राप्त नहीं हो सकी ।

शब्दानुशासन सम्बन्धी यह लघुकाय ग्रन्थ व्याकरण अध्येताओं के लिए अत्यन्त उपयोगी होगा ।[१]

ठे. प्राकृतभारती,
जयपुर

१. **नोंध :** आ कृति-लेख घणो अशुद्ध हतो. तेमां पूर्ति अने सुधारा तथा टिप्पणो पण आवश्यक हतां. अे बधुं कार्य, मूल प्रतना अभावमां घणुं कठिन अने श्रमसाध्य हतुं. वळी, पाणिनीय व्याकरण पर आधारित रचना होवाथी पण घणी महेनत करवी पडे तेम हतुं. ए बधुं श्रमभर्युं काम मुनि त्रैलोक्यमण्डनविजयजीए यथामति-शक्ति करी आप्युं छे, अने ए रीते कृति सम्पादन-कार्यमां तेमणे सिंहफाळो आपेल छे, एटलुं वाचको-सम्पादकनी जाण सारु. - **शी.**

गुणकित्त्व-षोडशिका

सर्वत्रेको गुणः प्रोक्तो, विद्भिः सार्व(र्वार्द्ध)धातुके ।
उपधाया लघोरेव, पुगन्तस्याऽलघोरपि ॥१॥

व्याख्या : **सर्वत्रे**ति निर्विशेषणे **सार्वार्द्धधातुके इकः**- इगन्तस्याऽङ्गस्य धातोः **विद्भिः**- शब्दानुशासनरहस्यबोधकैः **गुणः प्रोक्तः**- कथितः ।[१] अकारै-कारौकारा भवन्तीत्यर्थः । तत्र 'तिङ्शित् सार्वधातुकं' [३/४/११३] तिडिति लट् लुट् लृट् लेट् लोट् लङ् लिङ् आशिषिव्यतिरिक्तस्य ग्रहणं, लिङ्-लृटामष्टादशाऽऽदेशा गृह्यन्ते । शितस्त्वमी- शप्, श्लु, श्यन्, श्नु, श, श्नम्, श्ना, शतृ, शानच्, चानश् इति । शेषमार्द्धधातुकं लडादि ।[२] तत्र सार्वधातुके उदाहरति- तरति, नयति, भवति, एति । आर्द्धधातुके- कर्त्ता, चेता, स्तोता । सार्व[र्वार्द्ध]धातुके इति किं ? अग्नित्वम् । अग्नित्वमित्यत्र धातोरित्यनधिकृत्य विहितत्वान्नाऽऽर्द्धधातुकसञ्ज्ञा । अग्निकाम्यति । यदि हि प्रत्यये सतीत्युच्येत तदा इहाऽपि स्यात् ।

उपधाया लघोरेवेति उपधाया यदि गुणो भवति तदा लघोरेव ।[३] यथा- भेदनं, छेदनं, तोषणम् । न च भेत्ता, छेत्तेत्यत्र संयोगे गुरुरिति, गुरुत्वात् कथं गुण इति शक्यम् ? 'त्रसिगृधिधृषिक्षिपेः क्नुः' [३/२/१४०] 'हलन्ताच्च' [१/२/१०] ति क्नु-सनोः कित्त्वकरणेन ज्ञापितत्वात्, प्रत्ययादेरङ्गावयवस्य च हलोरानन्तर्यत्वे सत्यपि लघूपधायां गुणो न व्यावर्त्यत इति । यदि गुरुत्वादेव गुणो न स्यात् तदा कित्करणमनर्थकमेव स्यात् ।

पुगन्तस्याऽलघोरपीति दीर्घस्याऽपि गुणो भवति । यथा- श्लेपयति, ह्रेपयति, क्नोपयति ॥१॥

---

१. सार्वधातुकार्धधातुकयोः - ७/३/८४
२. आर्धधातुकं शेषः - ३/४/११४
३. पुगन्तलघूपधस्य च - ७/३/८६

तथाऽन्त्यस्याऽञ्णिति प्रोक्तो-ऽविचिण्णल्ङित्सु जागरेः ।
अभ्यस्तस्योपधाया नो, अचि पित्सार्वधातुके ॥२॥

व्याख्या : **अन्त्यस्य**- अवसानवर्त्तिनः इक**स्तथे**ति ह्रस्वस्य दीर्घस्य च गुणो **अञ्णिति प्रोक्त** इति, ञिति णिति प्रत्यये गुणो न भवति, तत्र वृद्ध्या तस्य बाधितत्वात् ।[१]

अविचिण्णल्ङित्सु जागरे इति जागृ इत्यस्याऽङ्गस्य गुणो भवति अविचिण्णल्ङित्सु परतः ।[२] इदं बाधकबाधनार्थं, न क्ङिती[१/२/५]त्यस्य ञिति णिति परेऽन्त्यवृद्धेश्च बाधनार्थमित्यर्थः । तथा च जागरयति, जागरकः, साधु जागरी, जागरं जागरं, जागरो(घञ्)वर्त्तते इत्यादौ वृद्ध्या न बाधः । कृते च गुणे 'अत उपधाया' [७/२/११६] इति वृद्धिः प्राप्नोति सा न भवति । यदि हि स्यादनर्थक एव गुणस्स्याच्चिण्णलोश्च प्रतिषेधवचनमनर्थकम् । विचिण्णल्ङित्सु यथाप्राप्तं कृगृजागृभ्यः क्वनः कित्वाद् गुणाभावो- जागृविः, चिण्- अजागारि, णल्- जजागार, अत्रोभयत्र वृद्धिः, ङित्- जागृतः, जागृथः, ङित्त्वाद् गुणाभावः । वीति केचिदिकारं उच्चारणार्थं वर्णयन्ति, तेन क्वसावपि वकारादौ गुणो न भवति- जजागृवान् । येषां तु नोच्चारणार्थस्तन्मते- जजागर्वानिति रूपम् । अजागरुः, अहं जजागर इत्यत्र गुणस्य प्रतिषेधः प्राप्नोति, नाऽप्रतिषेधात् । अविचिण्णल्ङित्सु इति पर्युदासोऽयम् । ततश्चाऽयमर्थः- विचिण्णल्ङि-व्यतिरिक्ते प्रत्यये गुणो भवति । विनादौ तु न विधिर्न प्रतिषेधः न गुणानुज्ञा । यदि केनापि प्राप्नोति तदा प्राप्नोत्येव । तेन जुसि चेति [७/३/८३] गुणोऽजागरुरित्यत्र । णलि तु णिद्भावपक्षे 'सार्वधातुकार्धधातुकयोः' [७/३/८४] इति गुणस्तेन जजागरेति सिद्धम् । अथवा जाग्र इति या प्राप्तिरसावानन्तर्याद् विचिण्णल्ङित्सु इति प्रतिषिध्यते । कित्यप्राप्तं प्राप्यः(प्य) प्राप्तं प्रतिषेधयति ।

अभ्यस्तस्येति अभ्यस्तसंज्ञकस्याऽङ्गस्य **उपधाया** इक इउऋऌनां [अचि] इत्यजादौ **पिति सार्वधातुके नो** इति गुणाभावः गुणो न भवतीत्यर्थः ।[३] नेनिजानि, अनेनिजं, वेविजानि, अवेविजं, परिवेविषाणि, पर्य्यवेविषम् । अभ्यस्तस्येति किं? वेदानि । अचीति किं ? नेनेक्ति । पिद्ग्रहणमुत्तरार्थम् ।

---

१. अचो ञ्णिति - ७/२/११५ २. जाग्रोऽविचिण्णल्ङित्सु - ७/३/८५
३. नाऽभ्यस्तस्याऽचि पिति सार्वधातुके - ७/३/८७

सार्वधातुक इति किं ? निनेजः । उपधाया इति किं ? जुहवानि, अजुहवम् । बहुलं छन्दसीति वक्तव्यं, जुजोषदिति यथा स्यात् ॥२॥

भूसुवोस्तिङ्युतो वृद्धि-र्लुकि हलि सार्वधातुके ।
विभाषोर्णोर्गुणोऽपृक्ते, न क्ङिति क्वचनाऽपि हि ॥३॥

व्याख्या : भूसुवोस्तिङि इति । नो इति वर्त्तते । ततश्चाऽयमर्थः- **भूसुवो** इत्येतयोः **तिङि** सार्वधातुके गुणो न भवति ।[१] अभूत्, अभूः, अभूवं, सुवै, सुवावहै, सुवामहै । सूतेर्लुग्विकरणस्येदं ग्रहणं, सुवति-सूवत्योर्विकरणेन तिङे व्यवधानात् । विकरणस्यैव च ङित्त्वाद् गुणाभावः सिद्धः । तिङ्ग्रहणं विकरणव्युदासार्थं, तेन तत्र गुणो भवत्येव यथा भवति । सार्वधातुक इत्येव- व्यतिभविषीष्ट । लिङाशिषीत्यार्द्धधातुकसंज्ञत्वाद् गुणो वृत्तः । अथ बोभवीति यङ्लुकि गुणप्रतिषेधः कस्मात् न भवति, ज्ञापकाद्, यदयं बोभूत्विति गुणाभावार्थं निपातनं करोति ।[२] यदि यङ्लुक्यपीदं भूसुवोस्तिङीति प्रावर्त्तिष्यत् तदा गुणाभावार्थं बोभूत्विति निपातनं नाऽकरिष्यत्, तत्तु कृतं तेन यङ्लुकि गुणः सिद्धः । प्राप्तमेव प्रतिषिध्यत इति वचनाद् नाऽभ्यस्तस्येत्यनुवर्त्तनाद्वाऽभ्यस्तस्य न गुणप्रतिषेधः ।

उतो वृद्धिर्लुकि हलीति [७/३/१८९] । पितीत्यनुवर्त्तते । इदमपि प्राप्तगुणे प्रतिषेधार्थम् । उकारान्तस्याऽङ्गस्य वृद्धिर्भवति लुकि सति हलादौ पिति सार्वधातुके । यौति, यौषि, यौमि, नौति, नौषि, नौमि, स्तौति, स्तौषि, स्तौमि । उत इति किं ? एति, एषि, एमि । लुकि इति किं ? सुनोति, सुनोषि, सुनोमि । हलीति किं ? यवानि, रवाणि । पितीत्येव- युतः, रुतः । अपि स्तुयाद्राजानं इत्यत्र हि ङित् पिन्न भवति, पिच्च ङिन्न भवतीति प्रतिषेधाद् वृद्धेरभावः । अत्राऽयं भावस्तपः पित्त्वाद् वृद्धौ प्राप्तायां यासुटो ङित्त्वेन सा प्रतिषिध्यते ।[३] ननु लिङो ङित्त्वात् तदादेशेषु स्थानिवद्भावेन तिङां ङित्त्वादेव वृद्धेरभावः सिद्धस्तत्किमर्थमिदमुच्यते ? मैवं, यासुट एव ङित्करणात् ज्ञायते लाश्रितं ङित्त्वं लादेशेषु न प्रवर्त्तते । यदि हि समुदाये 'स्थानिवद्' [१/४/१६] भावेन ङित्कार्यमभविष्यत् तदा यासुटो ङित्त्वं न व्यधास्यत् । विहितं च तत् ज्ञापयति

---

१. भूसुवोस्तिङि - ७/३/८८ २. दाधर्ति-दर्धर्षि-बोभूतु० - ७/४/६५
३. यासुट् परस्मैपदेषूदात्तो ङिच्च - ३/४/१०३

ङिति यत् कार्यं तल्लादेशेषु न भवतीति ङितो यत् कार्यं 'नित्यं ङित' [३/४/९९] 'इतश्चे' [३/४/१००] त्यादिकं तद् भवत्येव । नाभ्यस्तस्येति एतदिहानुवर्त्तते, योयोति, नोनोति इत्येवमाद्यर्थम् ।

विभाषोर्णोरिति[१] वृद्धिरित्यनुवर्त्तते हलादौ पिति सार्वधातुके लुकि इति च । ततश्च हलादौ पिति सार्वधातुके लुकि सति ऊर्णोतेर्विभाषा वृद्धिर्भवतीत्यर्थः । प्रोर्णौति, प्रोर्णोति, प्रोर्णोषि, प्रोर्णौषि, प्रोर्णोमि, प्रोर्णौमि । हलीत्येव- प्रार्णवानि ।

गुणोऽपृक्ते इति [७/३/९१] ऊर्णोतेर्द्धातोरपृक्ते पिति हलि सार्वधातुके गुणो भवति । प्रौर्णोत्, प्रौर्णोः । हलीत्यनुवर्त्तमाने यत् पृक्तग्रहणं क्रियते तेन तज्ज्ञाप्यते, भवत्येषा परिभाषा यस्मिन् विधिस्तदादावल्ग्रहणे इति पूर्वेण विभाषाबाधे नित्यार्थमिदम् ।

न क्ङिति क्वचनाऽपि हीति । क्ङितीति निमित्तसप्तम्येषा, क्ङिन्निमित्तो यो गुणः प्राप्नोति स न भवति ।[२] चितं, चितवान्, स्तुतं, स्तुतवान् । ङिति खल्वपि[३]- चिनुतः, चिन्वन्ति । गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते । 'ग्लाजिस्थश्च ग्स्नुः' [३/२/१३९], जिष्णुः ॥३॥

विहायैतान् वक्ष्यमाणान्, जुसीगन्तं मिदि शिति ।
तथा ङ्यृदृशं लिटि च, संयोगादिमृतं तथा ॥४॥

व्याख्या : **विहायैतान् वक्ष्यमाणा**निति । योऽयं 'न ङ्क्ङिती'ति निषेधः सः वक्ष्यमाणानपवादान् विहाय- परित्यज्य । तानेवाऽऽह-

जुसीगन्तमिति । जुसि प्रत्यये परतः इगन्तमङ्ग विहाय, तस्मिन् गुणो भवतीत्यर्थः ।[४] अजुहवुः, अबिभयुः, अबिभरुः । अथ विनुयुः, सुनुयुरित्यत्र कस्मान्न भवति, अत्र द्वे ङित्त्वे सार्वधातुकाश्रयं यासुडाश्रयं च । तत्र नाऽप्राप्ते सार्वधातुकाश्रयङित्त्वनिमित्ते प्रतिषेधे जुसि गुणः आरभ्यमाणस्तमेव बाधते । यासुडाश्रयङित्त्वनिमित्तं तु न बाधते, तत्र हि प्राप्ते चाऽप्राप्ते चाऽऽरभ्यत इति ।

मिदि शितीति मिदि- मेद्यति शिति प्रत्यये विहाय । तत्र हि शिति प्रत्यये परतो मिदेरङ्गस्येको गुणो भवति ।[५] यथा- मेद्यतिः, मेद्यन्ति । शितीत्येव-

१. ऊर्णोतेर्विभाषा - ७/३/९० २. क्ङिति च - १/१/५
३. खल्वपीति समस्तमव्ययं यथार्थे - ह.टि. ४. जुसि च - ७/३/८३
५. मिदेर्गुणः - ७/३/८२

मिद्यते । **तथा ऋदृशमिति** । अडिवात्(ङि)ऋवर्णान्तं दृशं च विहायेति सम्बन्धः ।[१] तत्र न ङितीति न प्रवर्त्तते इत्यर्थः, किन्तु ऋवर्णान्तानां दृशेश्चाऽपि ङिपरतो गुणो भवतीत्यर्थः । शकलाङ्गुष्टकोऽकरत् अहं तेभ्योऽकरं नमः (?)। असरत्, आरत्, जरा । दृशेः- अदर्शत्, अदर्शतां, अदर्शन्निति ।

लिटि च संयोगादिमृतं तथेति । लिटि च परोक्षे संयोगादि-संयुक्तादिमृतं- ऋकारान्ताङ्गमपहाय न ङितीति निषेधः प्रवर्त्तते । तत्र तु 'ऋतश्च संयोगादेर्गुणः' [७/४/१०] इति गुणो भवति । यथा- स्वृ शब्दोपतापयोः [पाणि. धा. ९९८]- सस्वरतुः, सस्वरुः । धृ कौटिल्ये [पाणि धा. १००५]- दध्वरतुः, दध्वरुः । स्मृ स्मरणे [पाणि धा. ८५९]- सस्मरतुः, सस्मरुः । ऋत इति किं ? चिक्षियतुः, चिक्षियुः । संयोगादेरिति किं? चक्रतुः, चक्रुः । वृद्धिविषये तु वृद्धिरेव भवति । विप्रतिषेधेन संयोगोपधस्याऽपि लिटि गुणो भवतीति विज्ञेयं- संचस्करतुः, संचस्करुः । अत्र हि पूर्वं धातुः साधनेन युज्यते, पश्चादुपनतोपसर्गेणेत्यत्र दर्शने लिटि कृते तदाश्रये च द्विर्वचने पश्चादुपसर्गयोगे सत्यङ्ध्यासव्यवायेऽपीति [पाणि. वा. २५३९] सुडिह क्रियते । एवंकृत्वा संस्कृषीष्टेत्यत्र सुटो बहिरङ्गलक्षणस्याऽसिद्धत्वात् 'ऋतश्च संयोगादे'रिति[७/२/४३] इडागमो न भवति ॥४॥

ऋच्छत्यृतश्च याद्येषु, लिङ्-यङ्यक्षुपरेषु च ।
संयोगादिं तथाऽर्त्तिं च, दिधीवेव्योरिटश्च न ॥५॥

व्याख्या : **ऋच्छत्यृतश्चे**त्येतान् विहायेति प्राग्वत् । चकारेण लिटीत्य-नुकृष्यते । ततश्च लिटि परोक्षे ऋच्छतेरङ्गस्य ऋ-इत्येतस्य ऋकारान्तानां च गुणो भवतीत्यर्थः ।[२] ऋच्छ- आनर्च्छ, आनर्च्छतुः, आनर्च्छुः । ऋ- आर, आरतुः, आरुः । ऋकारान्तानां- कृ विक्षेपे [पाणि. धा. १५०२]- निचकरतुः, निचकरुः । गृ निगरणे [पाणि. धा. १५०३]- निजगरतुः, निजगरुः । ऋच्छेरलघूपधत्वात् सर्वथाऽप्राप्तो गुणो विधीयते । ऋतां तु न ङितीति प्रतिषेधे । वृद्धिविषये पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते- निजगार ।

याद्येषु लिङ्यङ्यक्षु परेषु च संयोगादिं तथाऽर्तिं चेति च- पुनः याद्येषु लिङ्-यङ्-यक्षु परेषु संयोगादिं तथार्तिं च परित्यज्य न ङितीति

---

१. ऋदृशोऽङि गुणः - ७/४/१६ २. ऋच्छत्यृताम् - ७/४/११

प्रतिषेधः प्रवर्त्तते इति सण्टङ्कः । अर्त्तेः संयोगादेश्च ऋतः निषेधं प्रतिषिध्य गुणो भवतीत्यर्थः ।[१] लिङीति आशीषिविहितलिङादेशा आर्धधातुकसंज्ञका गृह्यन्ते । लिङि- अर्यात् । संस्क्रियते, संस्क्रियात् । इह सुटो बहिरङ्गलक्षणस्याऽसिद्धत्वात् अभक्तत्वाद् वा संयोगादित्वं नाऽस्तीत्यङ्गस्य गुणो न प्रवर्त्तते । यङि- अरार्यते, सास्वर्यते, दीध्वर्यते, सास्मर्यते । अर्न्तेरङ्यर्त्त्यश्रृणोतीनामुपसंख्यानामिति यङ्नन्द्राः संयोगादय इति द्विर्वचनप्रतिषेधो यकारपरस्य नेष्यते इति (?) । यकि- अर्यते, स्मर्यते । याद्येष्विति संभवाद् व्यभिचाराच्च विशेषणं भवतीति । लिङो व्यभिचाराद् विशेषणम्, आत्मनेपदे सीष्टादौ लिङादेशत्वेऽपि यादित्वाभावाद् गुणो न प्रवर्त्तते । यङ्यकोः संभवाद् विशेषणं, व्यभिचाराभावात् ।

न ङ्किती त्यस्याऽपवादाः- **दीधीवेव्योरिटश्च ने**ति । दीधीङ् दीप्तिदेवनयोः [पाणि धा. ११५२] वेवीङ् वेतिना तुल्ये [पाणि धा. ११५३] । इट'श्चाऽऽर्धधातुकस्येड्वलादेः' [७/२/३५] इत्यादिना प्रकरणेन विहित आगमस्तस्य च गुणवृद्धी न भवति(तः), निमित्तानुपादानात् सर्वत्रेति भावः ।[२] वृद्धिरिटो न संभवति, [परं] यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गमिति परिभाषया इटोऽप्यङ्गेऽन्तर्भावात् अकारिषमित्यादौ लघूपधगुणः प्राप्तः, सोऽनेन प्रतिषिध्यते । श्वः कणिता, श्वो रणितेत्यादावन्त्यस्य गुणे प्राप्ते निषेधः । आदीध्यनं, आदीध्यकः, आवेव्यनं, आवेव्यकः । गुणवृद्ध्योरभावादेरनेकाचोऽङ्गस्य यण् ।[३] 'इको गुणवृद्धी' [१/१/३] इत्यतो गुणवृद्धीति पदमनुवर्त्तते ॥५॥

सर्वत्र न धातुलोपे, स[४] भवेदार्धधातुके ।
परस्मैपदे सिचीगन्ते, वृद्धिर्भवति बाधिका ॥६॥

व्याख्या :- **ते** इति गुणवृद्धी **सर्वत्र धातुलोपे आर्धधातुके**- तिङ्शिद्व्यतिरिक्ते प्रत्यये न भवेत्, निमित्ते सत्यपि । क्ङिद्व्यतिरिक्ते सार्व-धातुकार्धधातुकप्रत्यये निमित्तं, तस्मिन् सत्यपि तद्विधायकं सूत्रं न प्रवर्त्तते इत्यर्थः । धातुलोप इति अवयवे समुदायोपचाराद् धात्वेकदेशो धातुस्तस्य लोपो

१. गुणोऽर्त्तिसंयोगाद्योः - ७।४।२९
२. दीधीवेवीटाम् - १/१/६
३. एरनेकाचोऽसंयोगपूर्वस्य - ६/४/८२
४. टीकायां 'स' स्थाने 'ते' इति प्रतीकोपादानम्, पुनः तत्सम्बन्धि क्रियापदं 'भवेत्' इत्येव निर्दिष्टमित्यसमञ्जसता कथं समाधेयेति विद्वद्भिश्चिन्तनीयम् ।

यस्मिन्नार्द्धधातुके तदार्धधातुकं धातुलोपं, तत्र ये गुणवृद्धी प्राप्नुतस्ते न भवति इति गर्भार्थः ।[१] यथा- लोलुवः, पोपुवः, मरीमृजः । लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि विहिते यङोऽचि च [२/४/७४] इति यङ्लुकि कृते तमेवाऽचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः । धातुग्रहणं किं ? लूञ्, अनुबन्धलोपे भवत्येव, यथा- लविता । धातुग्रहणादेव प्रत्ययलोपे भवत्येव । यथा- रेट्, रिषे हिंसार्थस्य [पाणि. धा. ७३९] । विच्प्रत्ययलोपे उदाहरणम् । आर्धधातुकग्रहणात् सार्वधातुके भवत्येव । यथा- बोभोति, वरीवर्त्ति । इक इत्येव- अन्यत्र पापाचकः, अभाजि, रागः । पापाचक इत्यत्र यङो धात्ववयवस्य लोपे; अभाजि, राग इत्यत्र अनुस्वारस्य धात्ववयवस्य लोपेऽपि इग्लक्षणवृद्धेरभावा'दत उपधाया' इति [७/२/११६] वृद्धिर्भवत्येव ।

परस्मैपदे सिचीगन्ते वृद्धिर्भवति बाधिका इति **परस्मैपदे सिचि** परतः **इगन्ताङ्गे वृद्धिर्बाधिका भवति** अर्थाद् गुणस्य ।[२] अवैषीत्, अनैषीत्, अलावीत्, अवावीत्, अकार्षीत् । अन्तरङ्गमपि गुणमेषा वृद्धिर्ज्ञापकत्वाद् बाधत इत्यर्थः । अन्तरङ्गत्वं पुनर्गुणस्याऽऽर्द्धधातुकमात्रापेक्षत्वात् । वृद्धेस्तु आर्धधातुकविशेष-परस्मैपदपर-सिचमपेक्षमाणाया बहिरङ्गत्वं च । ज्ञापकं त्विदम्- यद्यन्तरङ्गो गुणो वृद्धेः प्राक् प्रवर्त्तेत तदा सर्वत्राऽयादेशे कृते यान्तत्वादेव 'ह्म्यन्तक्षणे'ति [७/२/५] वृद्धिनिषेधे सिद्धे, तत्रैव णिश्रि-ग्रहणं न कुर्यात्, तत्तु कृतं, तत्करणाज्ज्ञायते अन्तरङ्गमपि गुणं वृद्धिर्बाधत इति । परस्मैपद इति किं ? अच्योष्ट, अश्लोष्ट । इगन्त इति किं ? अदेवीत्, असेवीत् । इगुपधस्य गुणो भवत्येव ॥६॥

जागृणिश्चीन् विहायैवा-ऽनिटां चैवाऽविशेषतः ।
बाधते वृद्धिरत्यन्तं, मृजेर्वृद्धिर्गुणाद् भवेत् ॥७॥

व्याख्या : **जागृणिश्चीन् विहायैवेति** एतान् परित्यज्य वृद्धिर्बाधिका भवति, एतेषु गुण एव भवतीत्यर्थः । जागृ- अजागरीत् । अत्र जागृ-ई इति स्थिते पूर्वं यण् प्राप्तस्तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिस्तां जागर्त्ति गुणस्तत्र कृते हलन्तलक्षणा वृद्धिः । अङ्गवृत्त इत्येतत्तु निष्ठितत्वाच्च दुर्ज्ञानत्वादनाश्रित्य यदि, तर्हि गुणे रपरत्वे च कृति लक्षणान्तरेण वृद्धिर्भवति तदा जागरक इत्यादावजन्तलक्षणां वृद्धिं बाधित्वा गुणे प्रवृत्ते रपरत्वे च 'अत

१. न धातुलोप आर्धधातुके - १/१/४ २. सिचि वृद्धिः परस्मैपदेषु - ७/२/१

उपधाया' [७/२/११६] इति वृद्धिः प्राप्नोति, नैष दोषः, चिण्णमुलोर्गुण-प्रतिषेधाल्लिङ्गादुपधालक्षणवृद्धिर्न भवति इत्यवसीयते । अन्यथा चिण्णमुलोः गुणरपरत्वयोः कृतयोरुपधालक्षणया वृद्ध्या सिध्यति रूपमिति प्रतिषेधं न विदध्यात् ।[१] 'यदि तु गुणे कृते वृद्धिमात्राप्रवृत्ते लिङ्गं चेण्णमुलोः प्रतिषेध आश्रीयते तदा जागृग्रहणं शक्यमकर्तुं, सो 'नेटि' इत्यनेन [७/२/४] प्रतिषिध्यते तस्यां च प्रतिषिद्धायां 'अतो हलादे'रिति [७/२/७] विकल्पः प्राप्नोति, तमपि बाधित्वा'दतो ल्रान्तस्ये'ति [७/२/२] नित्या वृद्धिः । तां बाधितुं जागृणिश्वी[ति] जागृग्रहणम् । तथोक्तम्-

''गुणोवृद्धिर्गुणो वृद्धिः, प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽतो, यण्पूर्वाः प्राप्तयो न वा ॥'' इति

क्ङित्यचि मृजेर्वृद्धिर्वेष्यते[२], तेन मृजन्ति, मार्जन्तीति रूपद्वयसिद्धिः, सा तु गुण(णा)विषयकत्वान्नोक्ता । णि- ऊनयीत्, एलयीत् । श्वि- अश्वयीत् ।

अनिटां चैवाऽविशेषतः बाधते वृद्धिरत्यन्तमिति च पुनरनिटां धातूनां अविशेषत एव सामान्यत एव अन्ते उपधायां चेत्यर्थः, अत्यन्तमपवादराहित्येन वृद्धिर्बाधते ।[३] अकार्षीत्, अहार्षीत्, अभैत्सीत्, अच्छैत्सीदिति ।[४]

मृजेर्वृद्धिः [७/२/११४] **गुणाद् भवेत्** इति गुणाद् गुणनिमित्ताद् गुणकारणात् क्ङिद्भर्जसार्वधातुकार्द्धधातुकादिति, यावदर्थाद् गुणं बाधित्वा वृद्धिर्भवति निरवकाशत्वात् । मार्ष्टा, मार्ष्टव्यं, परिमार्ष्टि ॥७॥

तथैव शीङः सर्वत्र, गुणः स्यात् सार्वधातुके ।
सिच् ऊ(च्यू)र्णोतेर्विकल्पेन, गुणस्य विषयस्त्वयम् ॥८॥

व्याख्या :- **तथैव शीङः सर्वत्र गुणः स्यात् सार्वधातुके** इति शीङः सर्वत्र सार्वधातुके गुणस्स्यात् ।[५] सर्वत्रग्रहणं न क्ङितीति निषेधबाधनार्थम्, तेन तत्रापि गुणो भवतीत्यर्थः । शेते, शयाते, शेरते । सार्वधातुक इति किं ?

१. चिण्णमुलोर्दीर्घोऽन्यतरस्याम् - ६/४/९३
२. मृजेरजादौ सङ्क्रमे विभाषा वृद्धिरिष्यते - वा० ।
३. 'नेटि' [७/२/४] इत्यनेन सूचितमिदम् ।
४. सिचि वृद्धि० - ७/२/१, वदव्रजहलन्तस्याऽचः - ७/२/३
५. शीङः सार्वधातुके गुणः - ७/१/२१

शिश्ये। लिडादेशानां तिङ्शितां 'लिङ्चे'ति [३/३/१५९] सूत्रेणाऽऽर्द्धधातुकत्वप्रतिपादनात् प्रत्युदाहरणम् ।

सिचीति **ऊर्णोतेः** इडादौ सिचि परस्मैपदे परे परतो विकल्पेन गुणो भवति ।[१] प्रौर्णवीत् । पक्षे वृद्धिः- प्रौर्णावीत् । 'विभाषोर्णोः' [१/२/३] इत्यङित्त्वपक्षे वृद्धिविकल्पोऽयम् । ङित्त्वपक्षे तु गुणवृद्ध्योरभावे तु उवङ् भवति- प्रौर्णुवीत् । **अयं**- पूर्वोक्तो **गुणस्य विषयः** - गोचरं, प्रोक्तः इति गम्यते, तुः पादपूर्त्तौ ॥८॥

कुटादिभ्योऽञ्णितः सर्वे, गाङश्चाऽपि ङितः स्मृताः ।
विज इड् विभाषोर्णोते-स्तथाऽपित् सार्वधातुकम् ॥९॥

व्याख्या : **कुटादिभ्योऽञ्णितः सर्वे गाङश्चापि ङित स्मृता** इति। गुणप्रतिषेधविषये 'न क्ङिति क्वचनाऽपिही'त्युक्तम् । तत्रौपदेशिकस्य सुखाभिगम्यत्वादातिदेशिकं ङित्त्वं दर्शयन्नाह- कुट कौटिल्ये [पाणि. धा. १४५४] इत्यत आरभ्य यावत् कुङ् शब्दे [पाणि. धा. १४९३] एते कुटादयो गृह्यन्ते, तेभ्यस्तथा गाङः इति ङकारस्याऽनन्यार्थत्वादिङादेशो गृह्यते, न गां गता [पाणि. धा. १०१६] इति धातुः, तस्माच्च मे(परे)ऽञ्णितो ञिणि-तद्ध्यतिरिक्ताः सर्वे समस्ताः प्रत्यया ङितः स्मृता इति ङिद्वद् भवन्तीत्यर्थः ।[२] कथं पुनरन्तरेण वर्तिवत्यर्थो गम्यते ? उच्यते- अन्तरेणाऽपि वर्ति- वत्यर्थो गम्यते । यथा- सिंहो माणवकः, यथा वा अब्रह्मदत्तं ब्रह्मदत्त इत्याह (इत्युक्ते) ब्रह्मदत्तवदयं भवतीति प्रतीयते, एवमिहाऽपि अङितं ङिदित्याह, ङिद्वद्भवतीति गम्यते । कुटादिभ्यः- कुटिता, कुटितुं, कुटितव्यम्। गाङ्- अध्यगीष्ट, अध्यगीषातां, अध्यगीषत् । अञ्णित इति किं ? उत्कोटयति, उत्कोटकः, उत्कोटो वर्त्तते । व्यचेः कुटादित्वमनसीति वक्तव्यं[वा०]- विचिता; विचितुं, विचितव्यम् । अनसीति किं ? उरुव्यचाः ।

विज इडिति । ओविजी भयचलनयोरस्मात् पर इडादिप्रत्ययो ङिद् भवति।[३] उद्विजिता, उद्विजितुं, उद्विजितव्यम्। इडिति किं ? उद्वेजनीयम् ।

विभाषोर्णोतेरिति । इडित्यनुवर्त्तते। ऊर्णुञ् आच्छादने [पाणि. धा.

---

१. ऊर्णोतेर्विभाषा - ७/२/६ २. गाङ्कुटादिभ्योऽञ्णिन्ङित् - १/२/१
३. विज इट् - १/२/२

१११४] अस्मात् पर इडादिप्रत्ययो विभाषा- विकल्पेन ङिद्भवति ।[१] प्रोर्णुविता, प्रोर्णविता । इडित्येव- प्रोर्णवनं, प्रोर्णवनीयम् ।

तथाऽपित् सार्वधातुकमिति तथा अपित् सार्वधातुकं ङिद्वद् भवति ।[२] इडिति निवृत्तम् । कुरुतः, कुर्वन्ति, चिनुतः, चिन्वन्ति । सार्वधातुकमिति किं ? कर्त्ता, कर्त्तुं, कर्त्तव्यम् । अपिदिति किं ? करोति, करोषि, करोमि ॥९॥

लिङ् वाऽसंयोगतः कित् स्यात्, तथेधेर्भवतेः परः ।
क्त्वा मृडादिगणात् सेट्को, रुदादिभ्यः सना युतः ॥१०॥

व्याख्या : **लिङ् वाऽसंयोगतः कित् स्या**दिति वा-शब्द एवकारार्थः । असंयोगत एव- असंयोगादेव धातोः परो लिट्प्रत्ययः अपित् किद् भवति ।[३] बिभिदतुः, बिभिदुः, चिच्छिदतुः, चिच्छिदुः, ईजतुः, ईजुः । असंयोगादिति किं ? सस्रंसे, दध्वंसे । केचितु संयोगाल्लिटः कित्त्वं विकल्पयन्ति । तन्मते- ममथतुः, ममथुः ममन्थतुः, ममन्थुः । अपिदित्येव- बिभेदिथ । पूर्ववदत्राऽपि वतिमन्तरेणाऽपि वत्यर्थो गम्यते ।

तथेधेर्भवतेः पर इति । तथा इधेर्भवतेश्च परे लिट्प्रत्ययः किद् भवति ।[४] समीधे दस्युहतमम् । पुत्र ईधे अथर्वणः । भवतेः खल्वपि- बभूव, बभूविथ । इन्धेः संयोगार्थं ग्रहणम्, भवतेः पिदर्थं, तेन बभूवेत्यत्राऽऽतिदेशिककित्त्वेन स्वनिमित्तौपदेशिकणित्त्वस्योपहतत्वाद् वृद्धिसूत्रं न प्रवर्त्तते । गुणस्त्वविशेषविहितत्वेन तत्रापि प्रवर्त्तते एवेति तन्निवृत्तिर्न क्ङितीतित्यनेन ।

यत्तु कृष्णपण्डितेन- ''ननु इग्लक्षणयोर्गुणवृद्ध्योः क्ङिति चेति निषेध इत्युक्तं, तत्कथमज्लक्षणाया वृद्धेर्निषेधः ? न च कित्त्ववैयर्थ्यं, थलि उत्तमे णलि च गुणनिषेधार्थत्वेनोपपत्तेः, सत्यं, कित् ङिदित्युभयमत्राऽनुवर्त्तते । तत्र कित्त्वेनैव सिद्धे ङित्त्वविधेरज्लक्षणाया अपि निषेधो भवती''त्युक्तं तत्तु न सम्यक् प्रतिभाति, कित्त्वेन णित्त्वबाधात् किति तु विधिसूत्राभावादेव वृद्धेरभावस्ततो न क्ङितीति सूत्रेण तत्प्रतिषेधविधानं व्यर्थमेव । यदि विधायकसूत्राभावेऽपि वृद्धेः प्रतिषेधः क्रियेत, तदा भवतीत्यादौ पित्यपि प्रसजन्ती वृद्धिः कथं वार्या स्यात् ? कित् ङिदित्युभयमनुवर्त्तते इति यदुक्तं, तदपि न, अधिकारान्तरेणा-

---

१. विभाषोर्णोः - १/२/३
२. सार्वधातुकमपित् - १/२/४
३. असंयोगाल्लिट् कित् - १/२/५
४. इन्धिभवतिभ्यां च - १/२/६

ऽधिकारस्य बाध इति किदधिकारेण ङिदधिकारस्य बाधितत्वात्। उभयानुवृत्तौ हि वचिस्वपियजादीनां जागर्त्तेश्च संप्रसारणगुणयोर्विकल्पः प्रसज्येत।

ननु कृताकृतप्रसङ्गत्वेन नित्यत्वाद् वुगेव गुणवृद्धी बाधिष्यते तत् किं कित्त्वेन प्रतिषेधार्थेन ? न च कृतयोर्गुणवृद्ध्योरेजन्तस्य प्राप्नोत्यकृतयोस्तूदन्तस्येति शब्दान्तरप्राप्त्या वुकोऽनित्यत्वम् । एकदेश विकृतस्याऽनन्यत्वेन शब्दान्तर-प्राप्त्यभावात् । सत्यं, तदेतद् वार्त्तिककारस्य मतम् । यदाह- 'इन्धेः छन्दो-विषयत्वाद् भुवो वुको नित्यत्वात्, ताभ्यां लिटः किद्वचनानर्थक्यमिति । सूत्रकारस्तु मन्यते वुगनित्य इति । तद्विधौ हि 'ओः सुपि' [६/४/८३] इत्यतः ओरित्यनुवर्त्तते। उवर्णान्तस्य भुवो वुग् यथा स्यात्, बोभावेति यङि लुकि मा भूदिति । तत्र हि इन्धिभवतिभ्यां च इति श्तिपा निर्देशेन कित्त्वं व्यावर्त्यते, तेन वृद्धिरेव भवति । एवं च यथा तत्राऽनुवर्णान्तत्वाद् वुग् न भवति, एवं बभूवेत्यत्रापि वृद्धौ कृतायां न प्राप्नोतीत्यनित्यो वुक् परया वृद्ध्या मा बाधीत्यारम्भणीयं कित्त्वम् । एष एव च कित्त्वे श्तिपा निर्देशं लुकि च तदभावं कुर्वतः सूत्रकृतोऽभिप्रायः । अत्रेष्टिः(त्र)श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम् (वा०) । ग्रेथतुः, ग्रेथुः, देभतुः, देभुः, परिषस्वजे, परिषस्वजाते ।

क्त्वा मृडादिगणात् सेट्क इति । मृड् मृद् गुध् कुष् क्लिश् वद् वस् एते मृडादयः । एभ्यः परः सेट्क्त्वाप्रत्ययः किद्भवति ।[१] 'न क्त्वा सेडि'ति [१/२/१८] प्रतिषेधं वक्ष्यति, तस्याऽयं पुरस्तादपकर्षः, अपवाद इति यावत्। गुधकुषक्लिशानां तु 'रलो व्युपधा'दिति विकल्पे प्राप्ते नित्यार्थं वचनम्। मृडित्वा, मृदित्वा, गुधित्वा, कुषित्वा, क्लिशित्वा ।

रुदादिभ्यः सना युतः इति। रुदादिभ्य इति रुदादिगणात्, रुद् विद् मुष् ग्रहि स्वपि प्रच्छ इत्येतेभ्यः सना युतः क्त्वा, सन्प्रत्ययेन सहितः क्त्वाप्रत्ययः किद्भवति ।[२] रुदविदमुषाणां 'रलो व्युपधा'दिति विकल्पे प्राप्ते नित्यार्थं वचनं ग्रहे विध्यर्थमेव, स्वपिपृच्छ्योः सनर्थं ग्रहणं, किदेव हि क्त्वा। रुदित्वा, रुरुदिषते, विदित्वा, विविदिषते, मुषित्वा, मुमुषिषति, गृहीत्वा, जिघृक्षति, सुप्त्वा, सुषुप्सति, पृष्ट्वा, पिपृच्छिषति । ग्रहादीनां कित्त्वात् संप्रसारणं भवति।[३] 'किरश्च पञ्चभ्यः' [७/२/७५] इति पृच्छेरिडागमः ।

---

१. मृडमृदगुधकुषक्लिशवदवसः क्त्वा - १/२/७

२. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च - १/२/८ ३. ग्रहिज्यावयिव्यधि० - ६/१/१६

इगन्तादिगुपान्त्याच्च, झलादिसन् किदिष्यते ।
झलादी लिङ्सिचावात्म-नेपदेष्विगुपान्त्यतः ॥११॥

व्याख्या : **इगन्तादिगुपान्त्याच्च झलादिः सन् किदिष्यत** इति ।[१] सन्ग्रहणात् क्त्वेति निवृत्तम् । चिकीर्षति, जिहीर्षति । इगन्तादिति किं ? पिपासति, तिष्ठासति । कित्त्वाभावाद् घुमास्थेतीत्वाभावः [६/४/६६] । झलादिरिति किं ? शिशयिषते । इगुपान्त्याद्- बिभित्सति, बुभुत्सते । इगुपान्त्यादित्येव- यियक्षति । अकित्त्वात् सम्प्रसारणाभावः । झलादीत्येव- विवर्द्धिषते । इटा व्यवहितत्वात् सनो न कित्त्वं, तेनोपधागुणः । पाणिनीयसूत्रापेक्षया हल्- ग्रहणस्य जातिवाचकत्वात् सिद्धं- धिप्सति ।

झलादी लिङ्सिचावात्मनेपदेष्विगुपान्त्यत इति । इक उपान्त्यन्तस्थ- समीपे यस्य स इगुपान्त्यः- इगुपध इत्यर्थः । तस्मात् परौ झलादी लिङ्सिचौ आत्मनेपदेषु परतः कितौ भवतः ।[२] भित्सीष्ट, भुत्सीष्ट । सिचि [३]खल्वपि- अभित्त, अबुद्ध । इगुपान्त्य इति किं ? यक्षीष्ट, अयष्ट । अकित्त्वात् संप्रसारणा- भावः । आत्मनेपदेष्विति किं ? अस्राक्षीत्, अद्राक्षीत् । अत्र कित्त्वाभावात् 'सृजिदृशोर्झल्यमकिति' [६/१/५८] इत्यमागमः ।

ऋवर्णान्ताद् वा गमश्च, हनः सिच् गन्धने यमः ।
दक्षो दाक्षीसुतश्चख्यौ, वा चोपात् पाणिपीडने ॥१२॥

व्याख्या : **ऋवर्णान्तादि**ति । ऋवर्णान्ताद् धातोः परौ लिङ्- सिचावात्मनेपदेषु झलादी कितौ भवतः ।[४] कृषीष्ट, हृषीष्ट । सिचि खल्वपि- अकृत, अहृत । 'ह्रस्वादङ्गा'[८/२/२७]दिति सिचो लोपः । झलीत्येव- वरिषीष्ट, अवरिष्ट ।

वा गमश्चेति चकारो लिङ्सिचोरनुकरणार्थः । ततोऽयमर्थः- वेति विकल्पेन गमः परौ लिङ्सिचौ आत्मनेपदेषु झलादी कितौ भवतः ।[५] संगसीष्ट,

---

१. इको झल् - १/२/९, हलन्ताच्च - १/२/१०
२. लिङ्सिचावात्मनेपदेषु - १/२/११
३. खल्वपीति यथार्थेऽव्ययम् - ह. टि.
४. उश्च - १/२/१२ ५. वा गमः - १/२/१३

समगत, समगंस्त। संगंसीष्ट, अत्र कित्त्वपक्षेऽनुनासिकलोपो भव'त्यनुदात्तोपदेशवन-तितनोत्यादीना'[६/४/३७]मित्यनेन ।

हनः सिच् [१/२/१४] इति हन्तेर्धातो परः सिच् किद् भवति । आहत, आहसातां, आहसत । सिचः कित्त्वादनुनासिकलोपः । सिज्ग्रहणं लिङ्निवृत्यर्थं, उत्तरत्राऽनुर्वृत्तिर्मा भूत् । आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्तते, इह तु परस्मैपदेषु हन्तेर्वधभावस्य नित्यत्वात् कित्त्वस्य प्रयोजनं नास्ति ।[१]

गन्धने यम इति सिचावात्मनेपदेष्विति वर्त्तते । यमेर्धातोर्गन्धने वर्त्तमानात् परः सिच्प्रत्ययः किद् भवति आत्मनेपदेषु परतः ।[२] गन्धनं सूचनं परेण प्रच्छाद्यमानस्याऽवद्यस्याऽऽविष्करणम् । अनेकार्थत्वाद् धातूनां यमिस्तत्र वर्त्तते । उदायत, उदायसातां, उदायसत । सूचितवान् इत्यर्थः । सिचः कित्त्वादनुनासिक-लोपः ।

तथा **दक्षो दाक्षीसुतः**-पाणिनि**श्चख्यौ**- अचीकथत् । किं? **वा चोपात् पाणिपीडने** इति यमः सिश्चात्मनेपदेष्विति वर्त्तते । यमेर्धातोः परः सिच्प्रत्ययो विभाषा किद् भवति आत्मनेपदेषु परतः ।[३] उपायत कन्यां, उपायंस्त कन्याम्। उपायत भार्यां, उपायंस्त भार्याम् । पाणिपीडनं विवाहनं दारकर्मेति यावत् । उपाद्यमः स्वकरणे [१/३/५६] इत्यात्मनेपदम् ॥१२॥

स्थाघ्वोरिच्च विभाषा क्त्वा, थफान्तान्नोपधाच्च सेट् ।
[४]वञ्चिलुञ्चिऋतश्चाऽपि, काश्यपस्य तृषेर्मृषेः ॥१३॥

व्याख्या :- **स्थाघ्वोरिच्चे**ति [१/२/२७] सिजात्मनेपदेष्विति वर्त्तते। तिष्ठते-धातोर्घुसंज्ञकानां च इकारोऽन्तादेशः सिच्च किद् भवति आत्मनेपदेषु परतः। उपास्थित, उपास्थिषातां, उपास्थिषत । घुसंज्ञकानां- अदित, अधित । कित्त्वादन्त्यस्य न गुणः ।

